**विद्या भवन बालिका विद्यापीठ ,लखीसराय**

**वर्ग नवम् विषय संस्कृत शिक्षक श्यामउदय सिंह,**

**ता: 16-09-2021(एन.सी. आर. टी. पर आधारित)**

**बोर्ड बेस्ड क्वेश्चन**

1. **सुकन्या कोलकातानगरे छात्रावासे निवसति। सा विद्यालयतः शैक्षिकभ्रमणाय भुवनेश्वरं गन्तुम् इच्छति। एतद. र्थम् अनुमतिं राशिं च प्राप्तुं सा नवदिल्लीस्थं पितरं प्रति पत्रम् एकं लिखति। मञ्जूषातः पदानि विचित्य पत्रे रिक्तस्थानानि पूरयन्तु।**

छात्रावासः
राजकीयः विद्यालयः
(i)________
तिथिः 25-2-20XX

माननीयाः (ii)_________,
सादरं प्रणमामि।
भवतः पत्रं प्राप्तम्। मम (iii)________ परीक्षा समाप्ता। परीक्षापत्राणि अतिशोभनानि जातानि। यावत् परीक्षापरिणामः न आगच्छति तावत् आगामिमासस्य प्रथमसप्ताहे (iv)________ विद्यालयस्य अध्यापिकाः अस्मान् शैक्षिक भ्रमणाय (v)________ नेष्यन्ति। अहम् अपि ताभिः (vi)________ गन्तुम् इच्छामि। एतदर्थम् मया कक्षाध्यापिकायै (vii)________ रूप्यकाणि दातव्यानि सन्ति। अतः यदि अनुमतिः (viii)________ तर्हि अहम् अपि गच्छेयम्। ज्ञानवर्धनार्थम् एतत् अतिरिच्य अवसरं च पश्यामि। अतः कृपया उपर्युक्तां राशिं प्रेषयित्वा माम् अनुगृहीतां कुर्वन्तु।
सर्वेभ्यः मम (ix)________ निवेदनीयाः।

भवतां प्रिया (x)________
सुकन्या

**मञ्जूषाः-** प्रणामाः, सह, कोलकातातः, स्यात्, पञ्चशतम्, पितृवर्याः, 110019, भुवनेश्वरम्, प्रथमसत्रीया, मम, पुत्री

2. **अस्वस्थतायाः हेतोः दिनद्वयस्य अवकाशार्थम् प्रधानाचार्य प्रति लिखिते प्रार्थनापत्रे मजूषायाः पदानि चित्वा रिक्तस्थानानि पूरयत-**

परीक्षाभवनम्

आदरणीयाः (i)_______।

**विषय-** अवकाशप्राप्तये निवेदनम्।

सविनयं (ii)_______ अस्ति यत् अहं (iii)_______ आक्रान्तः अस्मि। एतस्मात् कारणात् विद्यालयम् आगन्तुम् (iv)_______ अस्मि। अतः मह्यम् (v)_______ अवकाशं प्रदाय (vi)_______ अनुगृह्णन्तु। एतयोः दिवसयोः अध्ययनस्य या (vii)_______ भविष्यति ताम् (viii)_______ यतिष्ये। (ix)_______

भवदीयः

शिष्यः

क, ख, ग

तिथिः (x)_______

| |
|---|
| **मञ्जूषा-** दूरीकर्तुम्, हानिः, धन्यवादः, दिनद्वयस्य, प्रधानाचार्याः, असमर्थः, माम्, तीव्रज्वरेण, निवेदनम्, 20-8-20... |